दधिमण्डातकोपेतं तत्सर्पिर्जठरापहम् ।
श्वयथुं वातविष्टम्भं गुल्मार्शांसि च नाशयेत्” ॥
इति पञ्चकोलघृतम् ॥ * ॥
“चतुर्गुणे जले मूत्रे द्विगुणे चित्रकात् पले ।
कल्के सिद्धं घृतप्रस्थं सक्षारं जठरी पिबेत्” ॥
इति चित्रकघृतम् ॥
“पटोलमूलरजनीविड़ङ्गत्रिफलात्वचम् ।
काम्पिल्यको नीलिनी च त्रिवृता चेति चूर्णयेत् ॥
षड़ाद्यान् कार्षिकानन्त्यांस्त्रीन् द्वित्रिचतुर्गुणान् ।
कृत्वा चूर्णमतोमुष्टिं गवां मूत्रेण वा पिबेत् ॥
विरिक्तो मृदु भुञ्जीत भोजनं जाङ्गलैः रसैः ।
मण्डं पेयाञ्च पीत्वा च सव्योषं षड़हं पयः ॥
शृतं पिबेत्ततश्चूर्णं पिबेदेव पुनः पुनः ।
हन्ति सर्व्वोदराण्येतच्चूर्णं जातोदकान्यपि ।
कामलां पाण्डुरोगञ्च श्वयथुञ्चापकर्षति” ॥
इति पटोलाद्यं चूर्णम् ॥ * ॥
“नीलिनीं निचुलं व्योषं द्वौ क्षारौ लवणानि च ।
चित्रकञ्च पिबेच्चूर्णं सर्पिषोदरगुल्मनुत्” ॥
इति नीलिन्याद्यं चूर्णम् ॥ * ॥
“भावितानां गवां मूत्रे षष्टिकानान्तु तण्डुलैः ।
यवागूं पयसा सिद्धां प्रकामं भोजयेन्नरम् ॥
पिबेदिक्षुरसञ्चानु जठराणां निवृत्तये ।
स्वं स्वं स्थानं व्रजन्त्येषां तथा पित्तकफानिलाः ॥
क्रियातीते त्रिदोषे च जठरे चाप्यशाम्यति ।
ज्ञातीन् ससुहृदो दारान् ब्राह्मणान् नृपतीन् गुरून् ॥
अनुज्ञाप्य भिषक् कर्म्म विदध्यात्संशयं ब्रुवन् ।
अक्रियायां ध्रुवो मृत्युः क्रियायां संशयो भवेत् ॥
एवमाख्याय तस्येदमनुज्ञातः प्रयोजयेत् ।
पानभोजनसंयुक्तं विषमस्मै प्रदापयेत् ॥
यस्मिन् वा कुपितः सर्पो विसृजेद्धि फले विषम् ।
तेनास्य दोषसंघातः स्थिरो लीनो विमार्गगः ॥
विषेणाशु प्रमाथित्वादाशुभिन्नः प्रवर्त्तते ।
विषेण हृतदोषन्तं शीताम्बुपरिषेचितम् ॥
पाययेत भिषग्दुग्धं यवागूं वा यथाबलम् ।
त्रिवृन्मण्डूकपर्ण्यास्च शाकं सयववास्तुकम् ।
भक्षयेत्कालशाकं वा स्वरसोदकसाधितम् ॥
निरम्ललवणस्नेहं खिन्नाखिन्नमनन्नभुक् ।
मासमेकं ततस्चैव तृषितः स्वरसं पिबेत्” ॥
“इदन्तु शल्यहर्त्तॄणां कर्म्म स्याद्दृष्टकर्म्मणां ।
मात्रायुक्तेन शस्त्रेण पाटयेन्मतिमान् भिषक् ॥
विपाट्यान्त्रन्ततः पश्चाद्वीक्ष्य बद्धक्षतान्त्रयोः ।
सर्पिषाभ्यज्य केशादीनवमृज्य विमोचयेत् ॥
मूर्च्छनात् यच्च संमूढ़मन्त्रं यच्च विमोचयेत् ।
छिद्राण्यन्त्रस्य तु स्थूलैर्दंशयित्वा पिपीलिकैः ॥
बहुशः संगृहीतानि मत्वा छित्त्वा पिपीलिकान् ।
प्रतियोगैः प्रवेश्यान्त्रं बहिः सीव्येद्व्रणन्ततः ।
तथा जालोदकं सर्व्वमुदरं व्यधयेद्भिषक् ॥
वामपार्श्वे त्वधो नाभेर्नाड़ीं दत्त्वा च गालयेत् ।
निःस्राव्य च विमृज्यैतद्वेष्टयेद्वाससोदरम् ॥
तथा वस्तिविरेकाद्यैर्म्लानं सर्व्वञ्च वेष्टयेत् ।
निःसृते लङ्घितः पेयामस्नेहलवणां पिबेत् ॥
अतः परञ्च षण्मासान् क्षीरवृत्तिर्भवेन्नरः ।
त्रीन् मासान् पयसा पेयां पिबेत्त्रींश्चापि भोजयेत् ॥
श्यामाकङ्कोरदूष्यं वा क्षीरेण लघुभोजनः ।
नरः संवत्सरेणैवं जयेत् प्राप्तं जलोदरम् ॥
प्रयोगाणाञ्च सर्व्वेषामनुक्षीरं प्रयोजयेत् ।
दोषानुबन्धरक्षार्थं बलस्थैर्य्यार्थमेव च ॥
प्रयोगापचिताङ्गानां हितं ह्युदरिणां पयः ।
सर्व्वधातुक्षयार्त्तानां देवानाममृतं यथा” ॥
इति चरके चिकित्सितस्थानेऽष्टादशोऽध्यायः ।
“धन्वन्तरिर्धर्म्मभृतां वरिष्ठो
राजर्षिरिन्द्रप्रतिमो बभूव ।
ब्रह्मर्षिपुत्त्रं विनयोपपन्नं
शिष्यं शुभं सुश्रुतमन्वशात्सः ॥
पृथक्समस्तैरपि चेह दोषैः
प्लीहोदरं बद्धगुदं तथैव ।
आगन्तुकं सप्तममष्टमञ्च
दकोदरञ्चेति वदन्ति तानि ॥
सुदुर्व्वलाग्नेरहिताशनस्य
संशुष्कपूत्यन्ननिषेवणाद्वा ।
स्नेहादिमिथ्याचरणाच्च जन्तो-
र्वृद्धिं गताः कोष्ठमभिप्रपन्नाः ॥
गुल्माकृतिव्यञ्जितलक्षणानि
कुर्व्वन्ति घोराण्युदराणि दोषाः ।
कोष्ठादुपस्नेहवदन्नसारो
निःसृत्य दुष्टोऽनिलवेगनुन्नः ॥
त्वचः समुन्नम्य शनैः समन्ता-
द्विवर्द्धमानो जठरं करोति” ॥ * ॥
अस्य पूर्व्वरूपं यथा,—
“तत्पूर्व्वरूपं बलवर्णकाङ्क्षा-
बलीविनाशो जठरे हि राज्यः ।
जीर्णापरिज्ञानविदाहवत्यो
वस्तौ रुजः पादगतश्च शोफः” ॥
वातजादिभेदेन लक्षणानि यथा,—
“संगृह्य पार्श्वोदरपृष्ठनाभी-
र्यद्वर्द्धते कृष्णशिरावनद्धम् ।
सशूलमानाहवदुग्रशब्दम्
सतोदभेदं पवनात्मकन्तत् ॥ १ ॥
यच्चोषतृष्णाज्वरदाहयुक्तं
पीतं शिरा यत्र भवन्ति पीताः ।
पीताक्षिविण्मूत्रनखाननस्य
पित्तोत्तरं तत्त्वचिराभिवृद्धि ॥ २ ॥
यच्छीतलं शुक्लशिरावनद्धं
श्लक्ष्णं स्थिरं शुक्लनखाननस्य ।
स्निग्धं महच्छोफयुतं ससादं
कफोदरं तच्च चिराभिवृद्धि ॥ ३ ॥
विदाह्यभिष्यन्दिरतस्य जन्तोः
प्रदुष्टमत्यर्थमसृक्कफश्च ।
प्लीहाभिवृद्धिं सततं करोति
प्लीहोदरन्तत् प्रवदन्ति तज्ज्ञाः ॥
वामे च पार्श्वे परिवृद्धिमेति
विशेषतः सीदति चातुरोऽत्र ।
मन्दज्वराग्निः कफपित्तलिङ्गै-
रुपद्रुतः क्षीणबलोऽतिपाण्डुः ॥
सव्येतरस्मिन् यकृति प्रदुष्टे
ज्ञेयं यकृद्दाल्युदरं तदेव” ॥ ४ ॥
दूष्युदरं बद्धगुदोदरं परिस्राव्युदरं दकोदरञ्चेति
चतुर्णामुदराणां सुश्रुतीयं लक्षणादिकं यत् भाव-
प्रकाशे संगृहीतं तत्तावच्चान्यविधम् ॥
अस्य चिकित्सा यथा ।
“अष्टावुदराणि पूर्व्वमुद्दिष्टानि तेष्वसाध्यं बद्धगुदं
परिस्रावि चावशिष्टानि कृच्छ्रसाध्यानि सर्व्वाण्येव
च प्रत्याख्यायोपक्रमेत । तेष्वाद्यश्चतुर्व्वर्गो भेषज-
साध्यः । कालप्रकर्षात् सर्व्वाण्येव शस्त्रसाध्यानि
वर्ज्जयितव्यानि वा ॥
उदरी तु गुर्व्वभिष्यन्दिरूक्षविदाहिस्निग्धपिशित-
परिषेकावगाहान् परिहरेत् । शालियष्टिकयव-
गोधूमनीवारान्नित्यमश्नीयात् ॥
तत्र वातोदरिणं विदारिगन्धादिसिद्धेन सर्पिषा
स्नेहयित्वा तिल्वकविपक्केनानुलोम्य चित्राफलतैल-
प्रगाढ़ेन विदारिगन्धाकषायेणास्थापयेदनुवासयेच्च
शाल्वणेन चोपनाहयेदुदरम् । भोजयेच्चैनं विदा-
रिगन्धादिसिद्धेन क्षीरेण जाङ्गलरसेन चाभीक्ष्णं
स्वेदयेत् ॥ * ॥
पित्तोदरिणन्तु मधुरगणविपक्केन सर्पिषा स्नेह-
यित्वा श्यामात्रिफलात्रिवृद्विपक्केनानुलोम्य शर्क-
रामधुघृतप्रगाढ़ेन न्यग्रोधादिकषायेणास्थापये-
दनुवासयेच्च पायसेनोपनाहयेदुदरं भोजयेच्चैनं
विदारिगन्धादिसिद्धेन पयसा ॥ * ॥ श्लेष्मोदरिणं
पिप्पल्यादिकषायसिद्धेन सर्पिषोपस्नेह्य स्नुहीक्षी-
रविपक्केनानुलोम्य त्रिकटुकमूत्रक्षारतैलप्रगाढ़ेन
मुष्कादिकषायेणास्थापयेदनुवासयेच्च शणातसी-
धातकीकिण्वसर्षपमूलकवीजकल्केनोपनाहयेदु-
दरं भोजयेच्चैनं त्रिकटुकप्रगाढ़ेन कुलत्थयूषेण
पायसेन वा स्वेदयेच्चाभीक्ष्णम् ॥ * ॥
दूष्योदरिणन्तु प्रत्याख्याय सप्तलाशङ्खिनीस्वरस-
सिद्धेन सर्पिषा विरेचयेन्मासमर्द्धं मासं वा
महावृक्षक्षीरसुरागोमूत्रसिद्धेन वा शुद्धकोष्ठन्
मद्येनाश्वमारकगुञ्जाकाकादनीमूलकल्कं पाययेत् ।
इक्षुकाण्डानि वा कृष्णसर्पेण दंशयित्वा भक्षयेत् ।
वल्लीफलानि वा मूलजं कन्दजं वा विषमासेवयेत्
तेनागदो भवत्यन्यं वा भावमापद्यते ॥ * ॥
भवति चात्र,—
“कुपितानिलमूलत्वात् सञ्चयित्वान्मलस्य च ।
सर्व्वोदरेषु शंसन्ति बहुशस्त्वनुलोमनम्” ॥
ज्योतिष्कफलतैलं वा क्षीरेण स्वर्ज्जिकाहिङ्गुमिश्रं
पिबेत् ॥ गुड़द्वितीयां वा हरीतकीं भक्षयेत् ॥
स्नुहीक्षीरभावितानां वा पिप्पलीनां सहस्रं का-
लेन पथ्याकृष्णाचूर्णं वा स्नुहीभावितामुत्कारिकां
पक्वां दापयेत्” ॥
“प्लीहोदरिणः स्निग्धस्विन्नस्य दध्ना भुक्तवतो वाम-
बाहौ कूर्प्पराभ्यन्तरतः शिरां विध्येद्विमर्दयेत्
पाणिना प्लीहानं रुधिरस्यन्दनार्थं ततः संशुद्धदेहं
समुद्रशुक्तिकाक्षारं प .सा पाययेत हिङ्गुसौवर्चि-
काक्षारेण सुतेन पलाशक्षारेण वा यवक्षारम् ।
पारिजातकेक्षुरकापामार्गक्षारं वा तैलसंसृष्टम् ।